# श्रीसत्यसंकल्पतीर्थस्तुतिः

मंत्राक्षतप्रदानेन श्रियःपत्याभिधैर्बुधैः
द्युमणिं कारयामास सत्संकल्पो भवेन्मुदे ॥१॥

क्षामकाले करजिग्यां द्वादशाब्दं तपश्चरन्
अन्नदानं च यश्चक्रे सत्संकल्पो भवेन्मुदे ॥२॥

महिशूरमहाराजप्रार्थनानुगुणं च यः
महिशूरपुरावासः सत्संकल्पो भवेन्मुदे ॥३॥

सत्यसंतुष्टतीर्थेभ्यो ददौ तुर्याश्रमं च यः
तत्संसेवितपादाब्जः सत्संकल्पो भवेन्मुदे ॥४॥

हरिपादोद्भवा गंगा पावनी यस्य सन्निधौ
दृश्यतेऽद्यापि तद्भक्तैः सत्संकल्पो भवेन्मुदे ॥५॥

गुरुराजाभिधो विप्रो गुत्तलान्वयजः सुधीः
यत्सेवया यतिरभूत् सत्संकल्पो भवेन्मुदे ॥६॥

यो भक्त्या भजते नित्यं सत्यसंकल्पसद्गुरून्
श्लोकषट्कं पठन् तस्य शत्रुषट्कजयो भवेत् ॥७॥

॥ इति श्रीसत्यसंकल्पतीर्थस्तुतिः ॥